श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीभगवद्यामुनमुनिभिः अनुगृहीतः

# ॥ श्रीगीतार्थसङ्ग्रहः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगीतार्थसङ्ग्रहः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

स्वधर्मज्ञानवैराग्य साध्य भक्त्येकगोचरः।
नारायणः परं ब्रह्म गीताशास्त्रे समीरितः॥ 1 ॥

ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते।
आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते॥ 2 ॥

मध्यमे भगवत्तत्त्वयाथात्म्यावाप्तिसिद्धये।
ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः॥ 3 ॥

प्रधान पुरुषव्यक्त सर्वेश्वर विवेचनम्।
कर्मधीर्भक्तिरित्यादिः पूर्वशेषोऽन्तिमोदितः॥ 4 ॥

अस्थानस्नेहकारुण्य धर्माधर्मधियाकुलम्।
पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम्॥ 5 ॥

नित्यात्मासङ्गकर्मेहागोचरा साङ्ख्ययोगधीः।
द्वितीये स्थितधीलक्षा प्रोक्ता तन्मोहशान्तये॥ 6 ॥

असक्त्या लोकरक्षायै गुणेष्वारोप्य कर्तृताम्।
सर्वेश्वरे वा न्यस्योक्ता तृतीये कर्मकार्यता॥ 7 ॥

प्रसङ्गात् स्व स्वभावोक्तिः कर्मणोऽकर्मतास्य च।
भेदा ज्ञानस्य माहात्म्यं चतुर्थाध्याय उच्यते॥ 8 ॥

कर्मयोगस्य सौकर्यं शैघ्र्यं काश्चन तद्विधाः।
ब्रह्मज्ञानप्रकारश्च पञ्चमाध्याय उच्यते॥ 9 ॥

योगाभ्यासविधिर्योगी चतुर्धा योगसाधनम्।
योगसिद्धिस्स्वयोगस्य पारम्यं षष्ठ उच्यते॥ 10 ॥

स्वयाथात्म्यं प्रकृत्यास्य तिरोधिश्शरणागतिः।
भक्तभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तम उच्यते॥ 11 ॥

ऐश्वर्याक्षरयाथात्म्य भगवच्चरणार्थिनाम्।
वेद्योपादेयभावानाम् अष्टमे भेद उच्यते॥ 12 ॥

स्वमाहात्म्यं मनुष्यत्वे परत्वं च महात्मनाम्।
विशेषो नवमे योगो भक्तिरूपः प्रकीर्तितः॥ 13 ॥

स्वकल्याण गुणानन्त्य कृत्स्न स्वाधीनतामतिः।
भक्त्युत्पत्ति विवृद्ध्यर्था विस्तीर्णा दशमोदिता॥ 14 ॥

एकादशे स्व याथात्म्य साक्षात्कारावलोकनम्।
दत्तमुक्तं विदिप्राप्त्योः भक्त्येकोपायता तथा॥ 15 ॥

भक्तेश्श्रैष्ठ्यमुपायोक्तिरशक्तस्यात्मनिष्ठता।
तत्प्रकारास्त्वतिप्रीतिः भक्ते द्वादश उच्यते॥ 16 ॥

देहस्वरूपमात्माप्तिहेतुरात्मविशोधनम्।
बन्धहेतुर्विवेकश्च त्रयोदश उदीर्यते॥ 17 ॥

गुणबन्धविधा तेषां कर्तृत्वं तन्निवर्तनम्।
गतित्रयस्वमूलत्वं चतुर्दश उदीर्यते॥ 18 ॥

अचिन्मिश्रात् विशुद्धाच्च चेतनात् पुरुषोत्तमः।
व्यापनाद्भरणात् स्वाम्यात् अन्यः पञ्चदशोदितः॥ 19 ॥

देवासुर विभागोक्ति पूर्विका शास्त्रवश्यता।
तत्त्वानुष्ठान विज्ञानस्थेम्ने षोडश उच्यते॥ **20** ॥

अशास्त्रमासुरं कृत्स्नं शास्त्रीयं गुणतः पृथक्।
लक्षणं शास्त्र सिद्धस्य त्रिधा सप्तदशोदितम्॥ **21** ॥

ईश्वरे कर्तृता बुद्धिः सत्त्वोपादेयतान्तिमे।
स्वकर्म परिणामश्च शास्त्रसारार्थ उच्यते॥ **22** ॥

कर्मयोगस्तपस्तीर्थदान यज्ञादिसेवनम्।
ज्ञानयोगो जितस्वान्तैः परिशुद्धात्मनि स्थितिः॥ **23** ॥

भक्तियोगः परैकान्तप्रीत्या ध्यानादिषु स्थितिः।
त्रयाणामपि योगानां त्रिभिरन्योन्य सङ्गमः॥ **24** ॥

नित्यनैमित्तिकानाञ्च पराराधनरूपिणाम्।
आत्मदृष्टेस्त्रयोऽप्येते योगद्वारेण साधकाः॥ **25** ॥

निरस्तनिखिलाज्ञानो दृष्ट्वात्मानं परानुगम्।
प्रतिलभ्य परां भक्तिं तयैवाप्नोति तत्पदम्॥ **26** ॥

भक्तियोगस्तदर्थी चेत्समग्रैश्वर्यसाधकः।
आत्मार्थी चेत्त्रयोऽप्येते तत्कैवल्यस्य साधकाः॥ **27** ॥

ऐकान्त्यं भगवत्येषां समानमधिकारिणाम्।
यावत्प्राप्ति परार्थी चेत्तदेवात्यन्तमश्नुते॥ **28** ॥

ज्ञानी तु परमैकान्ती तदायत्तात्मजीवनः।
तत्संश्लेष वियोगैक सुखदुःखस्तदेकधीः॥ **29** ॥

भगवद्ध्यान योगोक्तिवन्दन स्तुतिकीर्तनैः।
लब्धात्मा तद्गतप्राणमनोबुद्धीन्द्रियक्रियः॥ **30** ॥

निजकर्मादि भक्त्यन्तं कुर्यात् प्रीत्यैव कारितः।
उपायतां परित्यज्य न्यस्येद्देवे तु तामभीः ॥ 31 ॥

एकान्तात्यन्त दास्यैकरतिस्तत्पदमाप्नुयात्।
तत्प्रधानमिदं शास्त्रमिति गीतार्थसङ्ग्रहः ॥ 32 ॥

॥ इति श्रीगीतार्थसङ्ग्रहः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥